# ॥ शिवशिवास्तुतिः ॥

नमो नमस्ते गिरिशाय तुभ्यं
नमो नमस्ते गिरिकन्यकायै।
नमो नमस्ते वृषभध्वजाय
सिंहध्वजायै च नमो नमस्ते॥ १ ॥

नमो नमो भूतिविभूषणाय
नमो नमश्चन्दनरूषितायै।
नमो नमः फालविलोचनाय
नमो नमः पद्मविलोचनायै॥ २ ॥

त्रिशूलहस्ताय नमो नमस्ते
नमो नमः पद्मलसत्करायै।
नमो नमो दिग्वसनाय तुभ्यं
चित्राम्बरायै च नमो नमस्ते॥ ३ ॥

चन्द्रावतंसाय नमो नमस्ते
नमोऽस्तु चन्द्राभरणाञ्चितायै।
नमः सुवर्णाङ्कितकुण्डलाय
नमोऽस्तु रत्नोज्ज्वलकुण्डलायै॥ ४ ॥

नमोऽस्तु ताराग्रहमालिकाय
नमोऽस्तु हारान्वितकन्धरायै।
सुवर्णवर्णाय नमो नमस्ते
नमः सुवर्णाधिकसुन्दरायै॥ ५ ॥

नमो नमस्ते त्रिपुरान्तकाय
नमो नमस्ते मधुनाशनायै।
नमो नमस्त्वन्धकसूदनाय
नमो नमः कैटभसूदनायै॥ ६ ॥

नमो नमो ज्ञानमयाय नित्यं
नमश्चिदानन्दघनप्रदायै।
नमो जटाजूटविराजिताय
नमोऽस्तु वेणीफणिमण्डितायै॥ ७ ॥

नमोऽस्तु कर्पूरसाकराय
नमो लसत्कुङ्कुममण्डितायै।
नमोऽस्तु बिल्वाम्रफलार्चिताय
नमोऽस्तु कुन्दप्रसवार्चितायै॥ ८ ॥

नमो जगन्मण्डलमण्डनाय
नमो मणिभ्राजितमण्डनायै।
नमोऽस्तु वेदान्तगणस्तुताय
नमोऽस्तु विश्वेश्वरसंस्तुतायै॥ ९ ॥

नमोऽस्तु सर्वामरपूजिताय
नमोऽस्तु पद्मार्चितपादुकायै।
नमः शिवालिङ्गितविग्रहाय
नमः शिवालिङ्गितविग्रहायै॥ १० ॥

नमो नमस्ते जनकाय नित्यं
नमो नमस्ते गिरिजे जनन्यै।
नमो नमोऽनङ्गहराय नित्यं
नमो नमोऽनङ्गविवर्धनायै॥ ११ ॥

नमो नमस्तेऽस्तु विषाशनाय
नमो नमस्तेऽस्तु सुधाशनायै।
नमो नमस्तेऽस्तु महेश्वराय
श्रीचन्दने देवि नमो नमस्ते॥ १२ ॥

॥ इति श्री-कार्त्तिकेयविरचिता श्री-शिवशिवास्तुतिः सम्पूर्णा ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Shivashivaa_Stuti.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits